

# 8. उपसर्गाव्ययप्रत्ययाः

---

## अभ्यासाः


### प्रश्न 1. उपसर्गान संयुज्य पदरचनां कुरुत-





विशेष: (वि + शेष:)
विकार: (वि + कार:)
विहार: (वि + हार:)
विवाद: (वि + वाद:)

सुगन्ध: (सु + गन्ध:)
सुकन्या (सु + कन्या)
सुबुद्धि: (सु + बुद्धि:)
सुदर्शन (.................. + ..................)









अपमान: (अप + मान:)
अपयश:(.................. + ..................)
अपकार: (अप + कार:)

दुर्दशा (.................. + ..................)
दुर्बुद्धि: (दुर्+ बुद्धि:)
दुर्जन: (.................. + ..................)
दुराचारी (दुर् + आचारी)


**उत्तराणि:**





विशेषः (वि + शेषः)
विकारः (वि + कारः)
विहारः (वि + हारः)
विहाय (वि + हाय)

सुगन्धः (सु + गन्धः)
सुकन्या (सु + कन्या)
सुबुद्धिः (सु + बुद्धिः)
सुदर्शन (**सु** + **दर्शन**)




अपमानः (अप + मानः)
अपयशः (**अप** + **यशः**)
अपकारः (अप + कारः)

दुर्दशा (**दुर्** + **दशा**)
दुर्बुद्धिः (दुर् + बुद्धिः)
दुर्जनः (**दुर्** + **जनः**)
दुराचारी (दुर् + आचारी)

**प्रश्न 2. उपसर्ग संयुज्म उचितैः धातुरूपैः रिक्तस्थानानि पूरयत-**

(i) गङ्गा हिमालयात् ____________ निस्सरति। (निस् + सृ, लट्)
(ii) कृषकाः क्षेत्रात् ____________। (आ + गम्, लङ)
(iii) वयं नियमान् ____________। (परि + पाल, लट)
(iv) छात्राः गुरौ आगते ____________। (उत् + स्था, लोट)
(v) विडाल: मूषकम् ____________ (अनु + सृ, लट्)
(vi) त्वं कक्षायां पाठं ध्यानेन ____________। (अवगम, विधि.)

(vii) बीजात् वृक्षः ____________ उद्भविष्यति (उद् + भू, लुट)
(viii) सेवकाः स्वामिनम् ____________। (उप + से + लट)
(ix) आद्याहं शीतं न ____________। (अनु + भू, लट्)

**उत्तराणि:**
(i) निस्सरति
(ii) आगच्छन्
(iii) परिपालयामः
(iv) उत्तिष्ठन्तु
(v) अनुसरति
(vi) अवगच्छेः
(vii) उद्भविष्यति
(viii) उपसेवन्ते
(ix) अनुभवामि

**प्रश्न 3. उचितैः उपसर्गयुक्तैः पदैः रिक्तस्थानानि पूरयत-**

(i) एषः मार्गः अतीव ____________। (दुर्ग + गमः)
(ii) कस्यापि अवगुणस्य ____________ मा कुरुय। (उत् + लेखम्)
(iii) ____________ अपि ____________ न करणीयः (निर + धनस्य, अप + मानः)
(iv) तव एतावत् ____________ यत् मम ____________ करोषि (दुस् + साहसम्, अप + मानम्)
(v) क्षम्यताम्, ____________ अहं तव ____________ करोमि। (निस् + सन्देहम्, सम् + मानम्)
(vi) लोकस्य एव श्रेयस्करम्। (सम् + रक्षणम्)

**उत्तराणि:**
(i) दुर्गमः
(ii) उल्लेखं
(iii) निर्धनस्य, अपामनः
(iv) दुस्साहसम्, अपमानं
(v) निस्सन्देहम्, सम्मानं
(vi) संरक्षणम्

**अभ्यासाः**

**प्रश्न 1. निम्नलिखितानाम् अव्ययानम् रिक्तस्थानेषु प्रयोगं कुरुत-**

सहसा, अपि, सर्वदा, यदा, अचिरम्, श्वः, ह्यः, इदानीम्, तदा

(i) ____________ निर्णयः न करणीयः।
(ii) ____________ गृहम् गच्छ।
(iii) अहम् ____________ वाराणसी गमिष्यामि।
(iv) ____________ प्रातः भ्रमणं कुर्यात्।
(v) ____________ मम गृहे उत्सवः आसीत्।
(vi) ____________ अहं संस्कृ तं पठामि।
(vii) त्वम् किं ____________ गच्छसि?
(viii) ____________ अहम् गमिष्यामि ____________ सः अत्र आगमिष्यति।

**उत्तराणि:**
(i) सहसा
(ii) अचिरम्
(iii) श्वः
(iv) सर्वदा
(v) ह्यः
(vi) इदानीम्
(vii) अपि
(viii) यदा, तदा

**प्रश्न 2. अधोलिखितेषु वाक्येषु अव्ययपदानि प्रयुक्तानि तत्पदं चित्वा यथास्थानं लिखत-**

**(i) यावत् परीक्षाकालः नायाति. तावत् परिश्रमं कुरु।**
**उत्तराणि:**
यावत्, तावत्

**(ii) कालः वृथा न यापनीयः।**
**उत्तराणि:**
वृथा

**(iii) अहं सम्प्रति गृहं गन्तुम् इच्छामि।**
**उत्तराणि:**
सम्प्रति

**(iv) यत्र-यत्र धूमः तत्र-तत्र अग्निः संभाव्यते।**
**उत्तराणि:**
यत्र-यत्र, तत्र-तत्र

**(v) पुरा अशोकः नाम राजा आसीत्।**
**उत्तराणि:**
पुरा

**(vi) शीघ्रं कार्यं समापय अन्यथा विलम्बः भविष्यति।**
**उत्तराणि:**
शीघ्रम्, अन्यथा

**(vii) अद्य प्रभृति अहं धूम्रपान न करष्यिामि।**
**उत्तराणि:**
अद्य, प्रभृति

**(viii) ईषत् हसित्वा सः तस्य उपहासं कृतवान्।**
**उत्तराणि:**
ईषत्

**(ix) सः मुहुर्मुहुः किम् पश्यति?**
**उत्तराणि:**
मुहुर्मुहुः

**(x) अहम् त्वाम् भूयोभूयः नमामि।**
**उत्तराणि:**
भूयोभूयः

**प्रश्न 3. कोष्ठकेभ्यः शुद्धम् अव्ययपदं चित्वा रिक्तस्थानं पूरयत-**

(i) अहं श्वं भ्रमणाय _____________ गमिष्यामि। (विना / ध्रुवम्)
(ii) विद्यालयम् _____________ उद्यानमस्ति। (समन्ततः / अन्यत्र)
(iii) _____________ वद। (उच्चैः / नीचैः)
(iv) _____________ सः पुस्तकं पठति। (अधुना / पुरा)
(v) त्वम् _____________ गच्छसि? (कुत्र/ एकत्र)
(vi) कोलाहलं _____________ कुरु (मा / एव)

(vii) अध्यापकं दृष्ट्वा छात्रः ____________ स्थितः। (तूष्णीं / धावति)
(viii) सुरेशः आपणं गच्छति ____________ च मित्रेण सह क्रीडिष्यति (अपि / अपरम्)

**उत्तराणि:**
(i) ध्रुवम्
(ii) समन्ततः
(iii) उच्चैः
(iv) अधुना
(v) कुत्र
(vi) मा
(vii) तूष्णीं
(viii) अपि

**प्रश्न 4. निम्नलिखित-अव्ययपदानां रिक्तस्थानेषु प्रयोगं कुरुत-**

कुतः, सहसा, नूनम्, यदि-तर्हि, प्रायः, अद्य, चिरम्, अथ, सर्वत्र, सदा

(i) भवान् ____________ आगतः?
(ii) ____________ पिपास अस्ति ____________ जलं पिबतु।
(iii) प्रज्ञा ____________ आगच्छति।
(iv) ____________ जनाः साक्षराः सन्ति।
(v) ____________ अद्य वर्षा भविष्यति।
(vi) ____________ सोमवासरः अस्ति।
(vii) पुष्पं ____________ गन्धयति।
(viii) ____________ कथा प्रारभ्यतो।
(ix) ईश्वरः ____________ अस्ति।
(x) माता पुत्री च ____________ नृत्यतः।

**उत्तराणि:**
(i) कुतः
(ii) यदि, तर्हि
(iii) सहसा
(iv) प्रायः
(v) नूनम
(vi) अद्य
(vii) सदा
(viii) अथ

(ix) सर्वत्र
(x) चिरम्

क्त्वा – प्रत्ययः

**अभ्यासाः**

**प्रश्न 1. कोष्ठके प्रदत्तधातुषु क्त्वाप्रत्ययप्रयोगेण रिक्तस्थानानि पूरयत-**

(i) रामः रावणं ____________ सीतां प्राप्नोत्। (हन्)
(ii) प्रश्नस्य उत्तरं ____________ छात्रः प्रसीदति। (ज्ञा)
(iii) सीता गीतायै पुस्तकं ____________ गच्छति। (दा)
(iv) सा कथां ____________ श्रावयति। (लिख)
(v) श्रोतारः कथा ____________ प्रसन्नाः भवन्ति। (श्रु)
(vi) बालाः ____________ आगच्छन्ति। (धाव)
(vii) पुष्पं ____________ प्रसीदामः। (घ्रा)
(viii) गायक : गीतं ____________ संतुष्टि प्राप्नोति। (ग)

**उत्तराणि:**
(i) हत्वा
(ii) ज्ञात्वा
(iii) दत्वा
(iv) लिखित्वा
(v) श्रुत्वा
(vi) धावित्वा
(vii) ध्रात्वा
(viii) गीत्वा

**ल्यप् – प्रत्ययः**

**प्रश्न 2. अधुना एतानि वाक्यानि पठन्तु भेदं चावगच्छन्तु-**

बालः पितरम् अनुगम्य कार्यं करोति। (अनु + गम् + ल्यप्)
अहं कार्यं समाप्य एव गमिष्यामि। (सम् + आप् + ल्यप्)
अहं कार्यं समाप्य एव गमिष्यामि। (सम + आप् + ल्यप्)
त्वम् वृक्षम् आरुह्य किं करोषि? (आ + रुह + ल्यप्)

महोदये! वृक्षात् फलं प्राप्य तुष्टो भवामि। एतेषु वाक्येष्वपि एकं कार्यं कृत्वा एवापरं कार्यं क्रियते परं यदा वयं ध्यानेन एतानि वाक्यानि पठामः तदा स्पष्टं भवति यदत्र क्त्वा स्थाने ल्यप् प्रत्ययस्य प्रयोगः अस्ति, यतः अत्र धातूनां प्रयोगः उपसर्गेण सह कृतः। अतः अत्र क्त्वा स्थाने ल्यप् प्रत्ययः अस्ति। अधुना प्रकृति-प्रत्यय-विभागेन विस्तरेण अवगच्छामः-

| यथा — | | **प्रकृतिः** | **प्रत्ययः** |
|---|---|---|---|
| | अनुगम्य | अनु+ गम् | ल्यप् |
| i. | प्रणम्य | प्र+नम् | .................... |
| ii. | .................... | सम्+आप् | ल्यप् |
| iii. | आरुह्य | ....................+.................... | .................... |
| iv. | आदाय | ....................+.................... | ल्यप् |

**उत्तराणि:**

| यथा— | | **प्रकृतिः** | **प्रत्ययः** |
|---|---|---|---|
| | अनुगम्य | अनु + गम् | ल्यप् |
| (*i*) | प्रणम्य | प्र+नम् | **ल्यप्** |
| (*ii*) | **समाप्य** | सम्+आप् | ल्यप् |
| (*iii*) | आरुह्य | **आ+रुह्+ल्यप्** | |
| (*iv*) | आदाय | **आ+दा** | ल्यप् |

**प्रश्न 3. समुचितप्रत्यय-प्रयोगेण वाक्यानि पूरयत-**

छात्रः कक्षायाम् ____________ (उत्थाय / उत्थात्वा) प्रश्नं पृच्छति। शिक्षकः उत्तरम ____________ (प्रदात्वा / प्रदीय) तं संतोषयति। छात्रः उत्तरं ____________ (ज्ञात्वा/ज्ञाय) प्रसन्नः भवति। सन्तुष्टः ____________ (भूत्वा / भवित्वा) पाठम् च सम्यक् ____________ (अवगत्वा / अवगत्य) मृहं गच्छति।

**उत्तराणि:**
उत्थाय, प्रदाय, ज्ञात्वा, भूत्वा, अवगत्य।

**प्रश्न 4. अधुना एतानि वाक्यानि पठन्तु-**

अहं जलं पातुम् इच्छामि। (पा + तुमुन्)
मयूरः नर्तितुम् स्वपक्षान् उद्घाटयति। (नृत् + तुमुन्)
विद्यालयं गन्तुम् छात्राः सज्जाः सन्ति। (गम् + तुमुन्)
पिता पुत्राय पुस्तकानि क्रेतुम् आपणं गच्छति। (क्रीण + तुमुन्)
अत्र द्रष्टुम्, पातुम्, नर्तितुम्, गन्तुम, क्रेतुम्, इति शब्देषु 'तुमुन्' प्रत्ययस्य प्रयोगः अस्ति। प्रायशः चतुर्थीविभक्तयर्थ 'तुमुन्' प्रत्ययस्य प्रयोगः भवति।

उपरि प्रयुक्तानां तुमुन्-प्रत्ययान्तपदानां प्रकृति-प्रत्यय-विभागं कृत्वा लिखत-
(i) द्रष्टुम् – _____ + ______
(ii) पातुम् – _____ + ______
(iii) नर्तितुम् – _____ + ______
(iv) गन्तुम् – _____ + ______
(v) क्रेतुम् – _____ + ______

**उत्तराणि:**
(i) द्रष्टुम् – दृश् + तुमुन्
(ii) पातुम् – पा + तुमुन्
(iii) नर्तितुम् – नृत् + तुमुन्
(iv) गन्तुम् – गम् + तुमुन्
(v) क्रेतुम् – क्रीण+ तुमुन्

**प्रश्न 5. अधुना कोष्ठके प्रदत्तधातुषु तुमुन् प्रत्ययस्य योगेन रिक्तस्थानानि पूरयत-**

एकः चौरः एकस्मिन् गृहे चौर्यं कृत्वा ____________ (धाव) इच्छति। गृहस्वामी तं दृष्ट्वा तं ____________ (ग्रह) धावति। मार्गे एकः वत्सः धेनोः क्षीरं ____________ (पा) तिष्ठति। छात्राः अपि ____________ (पठ्) विद्यालयं गच्छन्ति स्म। अतः जनसम्म धेनुना आहतः चौरः आत्मानं ____________ (रक्ष) असमर्थः अभवत्। अतः गृहस्वामी जनैः सह चौरं ____________ (बध्) समर्थः अभवत्।
उत्तराणि:
धावितुम्, ग्रहीतुम्, यातुम्, पठितुम्, रक्षितुम्, बद्धम्

**शतृ – प्रत्ययः**

**अभ्यासाः**

**प्रश्न 1. अधः पदत्तानि वाक्यानि ध्यानेन पठन्तु-**

गच्छन् बालकः अपतत्। (गम् + शतृ)
रुदन्तम् बालकं रोदनस्य कारणं पृच्छा। (रुद + शतृ)
कथां कथयता कथावाचकेन अद्य का कथा श्राविता? (कत् + शतृ + तृतीया विभक्ति)
हसतः बालकस्य नाम किम् अस्ति? (हस् + शतृ + षष्ठी)
एतेषु वाक्येषु गायन्ती, गच्छन्, रुदन्तम्, कथयता, हसतः इत्येताः क्रियाः अपूर्णाः सन्ति परं नृत्यति, अपतत्, पृच्छ, श्राविता, अस्ति इत्यादिभिः क्रियाभिः वाक्यानि पूर्णतां प्राप्नुवन्ति। वाक्ये शतृप्रत्यययुक्तः धातुः शब्दरुपेण परावर्तते, शब्दप्रयोगश्च विशेष्यरूपेण भवति। अतः अस्य लिङ्ग-विभक्ति वचनञ्च विशेषणानुसारं निर्धायन्ते।
संयोजनेन शतृ प्रत्ययस्य ‘अत्’ इति धातुषु प्रयुज्यते। पुल्लिङ्गे रूपाणि ‘गच्छत्’ शब्दानुसारं, स्त्रीलिङ्गे पुनः ‘ती’ इति संयुज्य (गच्छन्ती) ‘नदी’ शब्दानुसारं, नपुंसकलिङ्गे च ‘जगत्’ इति शब्दानुसारं भवन्ति।

**प्रश्न 2. अधोलिखितानि वाक्यानि पठित्वा अधुना एतत्सर्वम् प्रयोगेण जानीमः**

यथा- (गम् + शतृ) गच्छन्त्या बालिकया फलं खाद्यते।

हसन्तम्, पृच्छद्भिः, गन्छन्त्या, पश्चन्तः, यच्छते।

(i) पिता _____________ (हस् + शतृ) पुत्रं पठनाय कथयति।
(ii) पुस्तकं _____________ (दा + शतृ) छात्राय पुस्तकालयाध्यक्षः परीक्षायाः प्रवेशपत्रं यच्छति।
(iii) नाटकं _____________ (दृश् + शतृ) दर्शकाः करतलवादं कुर्वन्ति।
(iv) मार्गं _____________ (प्रच्छ् + शतृ) पथिकैः छायायां विश्राम्यते।

**उत्तराणि:**
(i) हसन्तम्
(ii) यच्छते
(ii) पश्चन्तः
(iv) पृच्छद्भिः
(v) गन्छन्त्या

**प्रश्न 3. अधुना समुचितपदप्रयोगेण रिक्तस्थानानि पुरयत-**

(i) रूप्यकाणि ____________ श्रमिकः प्रसन्नः भवति। (गणयन् / गणयतागणयन्तम्)
(ii) जलं ____________ छात्रेण कक्षायां स्थीयते (पिबन् / पिबता / पिबन्तम्)
(iii) पुत्रीं ____________ (पाल + शतृ) माता गीतं गायति (पालयन्ती / पालयत्य / पालयन्तीम्)
(iv) भोजनं ____________ (पच् + शतृ) सूदाय शाकानि प्रयच्छ। (पचन्तम् / पचति / पचते)
(v) सः उपरि ____________ (दृश् + शतृ) पतति। (दृश्यन् / पश्यन् / पश्न्ती)

**उत्तराणि:**
(i) गणयन्
(ii) पिबता
(iii) पालयन्ती
(iv) पचते
(v) पश्यन्

**शानच् प्रत्ययः**

**अभ्यासाः**

**प्रश्न 1. अधुना समुचितपदप्रयोगेण रिक्तस्थानानि पुरयत-**

(i) नाटकम् ____________ जनाः प्रसीदन्ति। (ईक्षमाणः / ईक्षमाणौ / ईक्षमाणाः)
(ii) सज्जनानां मैत्री क्रमेण ____________ भवति। (वर्धमाना / वर्धमाने / वर्धमानाः)
(iii) शीतेन ____________ वानरं खगाः गृहनिर्माणाय अकथयन् (कम्पमानः / कम्पमानम् / कम्पमानेन)
(iv) दीपावल्या प्रकाशेन ____________ वीथिषु अमावस्यायाः अन्धकारः सर्वथा नश्यति। (शोभमानायाम् / शोभमानयो / शोभमानसु)
(v) वृद्धः ____________ बालिकायै आशीर्वचनानि कथयति। (सेवमानायाः / सेवामानाम् / सेवमानायै)

**उत्तराणि:**
(i) ईक्षमाणाः
(ii) वर्धमाना
(iii) कम्पमानम्
(iv) शोभमानसु
(v) सेवमानायै

**प्रश्न 2. उदाहरणानुसारं पूर्वक्रियायां शतृ / शानच् प्रत्यय-प्रयोगेण वाक्यानि पुनः लिखत-**

यथा- शिशुः चलति, सः रोदिति-चलन्, शिशुः रोदिति।
याचकः याचते। सः एकं गृहं गच्छति।
यथा- याचमानः याचक: एकं गृहं गच्छति।
उपदेशकः उपदिशति। सः ज्ञानवान् करोति।
उषा गायति। सा उद्याने भ्रमति।
सैनिक: युद्धक्षेत्रे प्रहरति। सः शत्रु मारयति।
बालिका दुग्धं पिबति। सा प्रसन्ना भवति।
मोहन: दु:खं सहते। सः ईश्वरं प्रार्थयति।

**उत्तराणि:**
उपदिशन् उपदेशक: ज्ञानवार्ता करोति।
गीयमाना उषा उद्याने भ्रमति।
प्रहरन् सैनिकः युद्धक्षेत्रे शत्रु मारयति।
पिबन्ती बालिका दुग्धं प्रसन्ना भवति।
सहमानः मोहनः दुःखं ईश्वरं प्रार्थयति।

**क्तिन् प्रत्ययः**

**अभ्यासाः**

**प्रश्न 1. अधोलिखितवाक्येभ्यः क्तिन्-प्रत्ययुक्तान् शब्दान् आदाय उदाहरणानुसारं प्रकृति-प्रत्यय-विभागं कुरुत-**

| | | | |
|---|---|---|---|
| रामायणम् वाल्मीके: कृति: अस्ति- | कृति:- | कृ+ | क्तिन् |
| i. मनुष्यजन्मन: प्राप्ति: पुण्येन भवति। | ........................ | ........................ | ........................ |
| ii. रमाया: बुद्धि: अत्युत्तमा। | ........................ | ........................ | ........................ |
| iii. भक्त: ईश्वरस्य भक्तिं करोति। | ........................ | ........................ | ........................ |
| iv. वानरस्य दृष्टि: फले अस्ति। | ........................ | ........................ | ........................ |
| v. सिंहात् कस्य भीति: न जायते? | ........................ | ........................ | ........................ |

**उत्तराणि:**

| | | | | |
|---|---|---|---|---|
| रामायणम् वाल्मीकेः कृतिः अस्ति– | कृतिः | कृ+ | | क्तिन् |
| (*i*) मनुष्यजन्मनः <u>प्राप्तिः</u> पुण्येन भवति। | **प्राप्तिः** | **प्र** + **आप्** | + | **क्तिन्** |
| (*ii*) रमायाः <u>बुद्धिः</u> अत्युत्तमा। | **बुद्धिः** | **बुध्** | + | **क्तिन्** |
| (*iii*) भक्तः ईश्वरस्ये <u>भक्तिं</u> करोति। | **भक्तिम्** | **भज्** | + | **क्तिन्** |
| (*iv*) वानरस्य <u>दृष्टिः</u> फले अस्ति। | **दृष्टिः** | **दृश्** | + | **क्तिन्** |
| (*v*) सिंहात् कस्य <u>भीतिः</u> न जायते? | **भीतिः** | **भी** | + | **क्तिन्** |

**तद्धितप्रत्ययः**

**अभ्यासाः**

**प्रश्न 1. समुचितशब्द (✓) इति चिह्नन चिह्नी कुरुत, प्रदत्तस्थाने च लिखत-**

(i) मधुवान्/मधुमान् मधुः खादति। ____________
(ii) बलवन्तं/बलमन्तं जनं पश्य। ____________
(iii) विद्यामान्/विद्यावान् जगति शोभते ____________
(iv) रूपवता/रूपमता स्वरूपस्य गर्वः न करणीयः। ____________
(v) कीर्तिमता/कीर्तिवता कविकालिदासेन अभिज्ञानशाकुन्तलं नाम नाटकं रचितम्। ____________

**उत्तराणि:**

(i) मधुमान्
(ii) बलवन्तं
(iii) विद्यावान्
(iv) रूपवता
(v) कीर्तिमता

णिनि (इनि)

विशेषण-विशेष्य पदानि योजयत-

| | | | |
|---|---|---|---|
| धनिना | राजानम् | ........................ | ........................ |
| गुणिने | राज्ञि | ........................ | ........................ |
| रथिनम् | पुरुषेण | ........................ | ........................ |
| बलिनि | शासकम् | ........................ | ........................ |
| दण्डिनम् | नृपाय | ........................ | ........................ |

**उत्तराणि:**

| | | | |
|---|---|---|---|
| धनिना | राजानम् | **धनिना** | **पुरुषेण** |
| गुणिने | राज्ञि | **गुणिने** | **नृपाय** |
| रथिनम् | पुरुषेण | **रथिनम्** | **राजानम्** |
| बलिनि | शासकम् | **बलिनि** | **राज्ञि** |
| दण्डिनम् | नृपाय | **दण्डिनम्** | **शासकम्** |

**तरप् – लमप्**

**अभ्यासाः**

**प्रश्न 1. अधोलिखितवाक्येषु सुचितपदेन रिक्तस्थानपूर्ति कुरुत-**

(i) अविनाशः स्वकार्ये ____________। (पटुः / पटुतरः / पटुतमः)
(ii) सर्वेषु छोत्रेषु प्रमोदः ____________। (कुशलः / कुशलतरः / कुशलतमः)
(iii) फलेषु आम्रफलम् ____________। (मधुरम् / मधुतम् / मधुरतमम्)
(iv) अश्वगर्दभयोः मध्ये अश्वः ____________। (तीव्रः / तीव्रतरः / तीव्रतमः)
(v) गीतासुशीलायाः मध्ये गीता ____________। (कुशला / कुशलतरा / कुशलतमा)
(vi) वृक्षेषु देवदारुवृक्षः ____________। (उच्चः / उच्चतरः / उच्चतमः)

**उत्तराणि:**
(i) पटुः
(ii) कुशलतमः
(iii) मधुरतमम्
(iv) तीव्रतरः
(v) कुशलतरा
(vi) उच्चतमः

**मयट् प्रत्ययः**

**अभ्यासाः**

**प्रश्न 1. मयट् प्रत्यययुक्तानि पदानि आदाय प्रकृति-प्रत्यय-विभागं कुरुत-**

i. सौन्दर्यमयी कलिका उद्याने शोभते। .................... ....................
ii. स्वर्णमयम् आभूषणं बहुमूल्यं भवति। .................... ....................
iii. तुला लौहमयी भवति। .................... ....................
iv. शान्तिमयं जीवनमेव श्रेयस्करम्। .................... ....................
v. आनन्दमयं सुखमयम् च विद्यार्थिजीवनम्। .................... ....................

**उत्तराणि:**

(i) सौन्दर्यमयी कलिका उद्याने शोभते। – सौन्दर्य + मयट
(ii) स्वर्णमयम् आभूषणं बहुमूल्यं भवति। – स्वर्ण + मयट
(iii) तुला लौहमयी भवति। – लौह + मयट
(iv) शान्तिमयं जीवनमेव श्रेयस्करम् – शान्ति + मयट
(v) आनन्दमयं सुखमयम् च विद्यार्थिजीवनम् – आनन्द + मयट, सुख + मयट्

**स्त्री-प्रत्ययाः**

**अभ्यासाः**

**प्रश्न 1. प्रदत्तवाक्येषु लिङ्गपरिवर्तनं कृत्वा वाक्यानि पुनः लिखत-**
यथा- एकः बालः जलं पातुम् इच्छति। एका बालिका जलं पातुम् इच्छति।
(i) सः सेविकाम् आकारयति। ____________
(ii) अस्य नाटकस्य नायकः कः अस्ति? ____________
(iii) आचार्यः स्नेहेन पाठयति। ____________
(iv) चतुरा बालिका सम्माननीया। ____________
(v) श्रीमान् कुत्र गच्छति? ____________
(vi) सभायाम् अनेक विद्वांसः आगच्छन्। ____________
(vii) बुद्धिमान् बालः पुरस्कारं लभते। ____________
(viii) गतवली महिला किम् उक्तवती? ____________

**उत्तराणि:**
(i) सः सेविकाम् आकारयति। सा सेवकम् आकारयति।
(ii) अस्य नाटकस्य नायकः कः अस्ति? अस्य नाटकस्य नायिका का अस्ति?
(iii) आचार्यः स्नेहेन पाठयति। आचार्या स्नेहेन पाठयति।
(iv) चतुरा बालिका सम्माननीया। चतुरः बालकः सम्माननीयः।
(v) श्रीमान् कुत्र गच्छति? श्रीमती कुत्र गच्छति?

(vi) सभायाम् अनेक विद्वांसः आगच्छन्। सभायाम् अनेकाः विदुष्यः आगच्छन्।
(vii) बुद्धिमान् बालः पुरस्कारं लभते। बुद्धिमती बाला पुरस्कारं लभते।
(viii) गतवली महिला किम् उक्तवती? गतवान् पुरुषः किम् उक्तवान्?